This Question Paper consists **42** questions and **8** printed pages.
अस्मिन् प्रश्नपत्रे **42** प्रश्नाः एवम् **8** मुद्रित पृष्ठाः सन्ति।

**Roll No.**
**अनुक्रमाङ्कः**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. कूट सं. **55/S/O/S**

**Set A**

# SANSKRIT
# संस्कृतम्
# (209)

**Day and Date of Examination**
**( परीक्षादिवसः दिनाङ्कश्च )** ______________________

**Signature of Invigilators** **1.** ______________________
**( निरीक्षकयोः हस्ताक्षरम् )**
**2.** ______________________

**सामान्य अनुदेशाः :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर-पुस्तिकामध्ये लिखेत्।
4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति।
6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **55/S/O/S-A** अवश्यं लेखनीया।

# SANSKRIT

# संस्कृतम्

# (209)

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः - 100**

**निर्देशाः** (1) अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति।

(2) प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः।

(3) **सर्वे** प्रश्नाः **अनिवार्याः**।

**खण्ड - क**

1. मस्तिष्कं केन सबलं भवति? **1**

(A) दुग्धपानेन (B) मनोयोगेन (C) भाग्येन (D) परिश्रमेण

2. रक्तमुखः वानरः __________ वसति स्म। **1**

(A) कूपसमीपे (B) स्थले (C) जम्बुवृक्षे (D) तडागे

3. यस्मिन् निर्गते शरीरं नश्येत् सः युष्मासु __________। **1**

(A) वन्दनीयः (B) कनिष्ठः (C) पूजनीयः (D) श्रेष्ठः

4. मत्स्यजीविभिः __________ सह सरः निर्भत्स्यतां नीतः। **1**

(A) अनागतविधात्रा (B) यद्भविष्येण

(C) जलाशयेन (D) प्रत्युत्पन्नमतिना

5. आर्यभटेन ग्रहाणां नक्षत्राणां __________ महत्त्वपूर्णं ज्ञानम् दत्तम्। **1**

(A) गणनाविषयकम् (B) स्थितिविषयकम्

(C) गतिविषयकम् (D) प्रयोगविषयकम्

6. 'अहो, बहुमत्स्योऽयं ह्रदः' इति अत्र ह्रदः इति पदे का विभक्तिः? **1**

(A) षष्ठी (B) प्रथमा (C) द्वितीया (D) पञ्चमी

7. 'अशक्तैः <u>बलिनः</u> शत्रोः कर्त्तव्यं प्रपलायनम्'-अत्र रेखांकितपदे का विभक्तिः? **1**

(A) प्रथमा (B) द्वितीया (C) षष्ठी (D) पञ्चमी

8. 'लीलावती भास्कराचार्यस्य पुत्री आसीत्' – अत्र आसीत् क्रियापदे क: लकार: ? **1**

(A) लट् (B) लोट् (C) ऌट् (D) लङ्

9. 'आवयो:' इति पदस्य मूलशब्द: क: ? **1**

(A) आव (B) आवय (C) अस्मद् (D) युष्मद्

10. रिक्तस्थाने किं पदं भविष्यति ? **1**

"चत्वारि तस्य __________ "।

(A) क्षीयन्ते (B) दीयन्ते (C) प्राप्यन्ते (D) वर्धन्ते

11. मित्रस्य किमपि लक्षणद्वयं लिखत। **1+1=2**

12. (i) बोपदेव: मार्गे किम् अपश्यत् ? **1+1=2**

(ii) महिला: प्रतिदिनं घटान् कुत्र स्थापयति स्म ?

13. (i) सूर्यवैश्वानरोपमस्य कुलपते: किं नाम ? **1+1=2**

(ii) रामेणबालिन: वधाय समय: कुत्र कृत: ?

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत : **1x3=3**

चन्द्रकेतु: – भो भो राजान:! असंख्यातै: द्विरदन्तुरग-स्यन्दनस्थै: भवद्भि: कवचावृतै: एकस्मिन् पदातौ युगपत् यत्युद्धं प्रारब्धं तद्व: धिग्। अस्मान् च धिक्।

लव: (सोन्याथम्) आ: कथम् अनुकम्पते नाम ? (ससंभ्रमं विचिन्त्य) भवतु जृम्भकास्त्रेणतावत् सैन्यानि संस्तंभयामि। (इति नाट्येन मुञ्चति)

सुमन्त्र: – अये! किमिदानीं सैन्यघोषा: प्रशान्ता:। वत्स! मन्ये कुमारेण जृम्भकास्त्रं प्रयुक्तमिति।

**प्रश्ना:**

(i) कस्य सैनिकै: युगपत् युद्धम् आरब्धम् ?

(ii) जृम्भकास्त्रं केन प्रयुक्तम् ?

(iii) सैन्यघोषा: केन: प्रशान्ता: ?

15. कस्यचिदेकस्य चरित्रचित्रणं पञ्चवाक्येषु संस्कृतेन कुरुत – **1x5=5**

लव: **अथवा** कण्व:।

16. प्रश्नान् उत्तरत : **1+1=2**

(i) मौनं कीदृशं तप: अस्ति ?

(ii) अपात्रेभ्य: दत्तं दानं कीदृशं दानं भवति ?

17. (i) वयं केन भावेन कमपि न पश्येम ? **1+1=2**
(ii) सूर्यः कीदृशं मार्गम् अनुचरति ?

18. सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः । **1+1=2**
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ।।
(i) धर्मः सदा कुत्र आश्रितः ?
(ii) सत्यात् परं किं नास्ति ?

19. अत्रिः कुलपतिर्यत्र, सूर्यवैश्वानरोपमः । **2**
अत्र सीते ! त्वया दृष्टा तापसी धर्मचारिणी ।।
(i) कुलपतिः अत्रिः कीदृशः आसीत् ?
(ii) तत्र सीतया का दृष्टा ?

20. अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत : **1x3=3**
ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा भा गृधः कस्यस्विद्धनम् ।।
(i) इदं सर्वं जगत् केन व्याप्तम् अस्ति ?
(ii) मानवः वस्तूनाम् उपयोगः कथं कुर्यात् ?
(iii) कस्यापि धनं प्रति कीदृशः भावः स्यात् ?

21. निम्नलिखितपद्यस्य अन्वये रिक्तस्थानपूर्तिं कुरुत : **1x3=3**
ऊष्मतो म्लायते वर्णस्त्वकू फलं पुष्पमेव च ।
ग्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते ।।
**अन्वयः**
फलम्, पुष्पम्, एवम् च वर्णः ____(i)____ च ऊष्मतः ____(ii)____ शीर्यते, तेन स्पर्शः अपि अत्र ____(iii)____ ।

22. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुर्वन्तु : **1+1=2**
(i) चिन्ता बहुतरी तृणात् ।
(ii) तपः स्वधर्मवर्तित्वम् ।

23. (i) ''अहो महानुभावस्य सूर्यकुलकुमारस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिः'' इति कः कं वदति ? **1+1=2**
(ii) ''तात मा अतिमात्रं मम कृते उत्कण्ठस्व।'' अत्र मम सर्वनामपदं कस्मै प्रयुक्तम् ?

**24.** त्रिविधानि तपांसि कानि भवन्ति ? **2**

**25.** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत : **1x3=3**

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवइतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयलोऽपिगृहेविनश्यति।

(i) अरक्षितस्य रक्षा केन क्रियते ?

(ii) दैवइतस्य सुरक्षितस्य किं भवति ?

(iii) वने विसर्जितस्य अनाथस्य का गतिः ?

**26.** अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत : **1x3=3**

अतिश्रमं वहेद् भारं शीतोष्णं च न विन्दति।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत् गर्दभात्।।

(i) अस्मिन् पद्ये गर्दभस्य कति गुणाः कथिताः ?

(ii) गर्दभः विश्रामं विना किं करोति ?

(iii) ससन्तोषः इत्यस्य कः अर्थः ?

**27.** कस्यचिदेकस्य पाठस्य सारांशं पञ्चवाक्येषु लिखत : **1x5=5**

(i) त्याज्यं न धैर्यम्

(ii) यद्भविष्यो विनश्यति

(iii) कर्त्तव्यनिष्ठा

## खण्ड - ख

## ( अनुप्रयुक्तव्याकरणम् )

**28.** अधोलिखितेषु मूर्धन्यवर्णौ चित्वा लिखत : **1x2=2**

ग, घ, ऋ, च, ट, स

**29.** रेखाङ्कितपदेषु सन्धिच्छेदं कृत्वा सन्धिनाम लिखत : **1x3=3**

<u>सत्यमेवेश्वरो</u> लोके सत्ये धर्मः <u>सदाश्रितः</u>।
सत्यमूलानि सर्वाणि सत्या<u>न्नास्ति</u> परं पदम्।।

**30.** सन्धिं कुरुत : **1x2=2**

यदि आयुः <u>क्षयः + अस्ति</u> तदन्यत्रगतानामपि मृत्युः <u>भविष्यति + एव</u>।

**31.** 'ब्रह्मचर्य <u>महिंसा</u> च शरीरं <u>तप</u> उच्यते' – इति रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ? **1+1=2**

**32.** रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत : **1x3=3**

(i) ____(1)____ नेत्रेण

(ii) ____(5)____ इन्द्रियाणि

(iii) ____(2)____ मत्स्यौ

**33.** रेखाङ्कितपदयोः कः धातुः कश्च लकारः ? **1+1=2**

(i) सा लक्ष्मीः तस्य हृदयं दर्पमलिनम् नाकरोत्

(ii) पापं समाचरति वीतघृणो जघन्यः।

**34.** रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ? **1+1=2**

माता गुरुतरा भूमेः।

**35.** अधोलिखितयोः समस्तपदयोः विग्रहं कुरूत : **1+1=2**

(i) महात्मा

(ii) दुर्गाध्यक्षः

**36.** अधोलिखितविग्रहाणां कृते समस्तपदं लिखत : **1+1=2**

(i) प्रियं दर्शनं यस्य सः।

(ii) सूर्यस्य कुलम् तस्य कुमारः तस्य

**37.** रिक्तस्थाने किं पदं भविष्यति ? **1+1=2**

(i) अहो! सत्यममिहितं __________ (भवत्)

(ii) एषा सा दृश्यते __________ राजधानी पितुर्मय। (सीता)

**38.** रिक्तस्थानपूर्तिं कुरुत : **1x3=3**

(i) सर्वमेव __________ शरीरमनुपालयेत्। (परि + त्यज् + ल्यप्)

(ii) __________ इति यद्दानं दीयतेऽनुपकारिणे। (दा + तव्यत्)

(iii) ये उत्कोचलोमेन स्वामिनं __________ आत्मानमन्धतमसि पातयन्ति) (वञ्च् + क्त्वा)

## खण्ड - ग

## ( रचनाकौशलम् )

**39.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत : **1x5=5**

मिथिलायां विद्यापति नामकः महान् कविः वभूव। सः संस्कृतस्य मैथिलीभाषायाश्च महाकविः आसीत्। अवहट्ठ भाषायाम् अपितेन रचनाः कृताः। सः राज्ञः शिवसिंहस्य मित्रम् आसीत्। नृपस्य राजसभायां सः राजकविः आसीत्। विद्यापतिः महान् शिवभक्तः आसीत्। कथ्यते यत् महादेवः तस्य भक्त्या प्रसन्नो भूत्वा तस्मैबदु वरान् अयच्छत्।

**प्रश्ना :**

(i) विद्यापतिः कस्याः भाषायाः कविः आसीत्?

(ii) सः कस्य नृपस्य मित्रम् आसीत्?

(iii) विद्यापतिः कस्य भक्तः आसीत्?

(iv) विद्यापतये कः वरान् अयच्छत्?

(v) 'रुष्टः' इति पदस्य किं विलोमपदमत्र प्रयुक्तम्?

**40.** अधोलिखित विषयमधिकृत्यं मञ्जूषापदसहायतया एकम् अनुच्छेदं लिखत : **1x5=5**

विज्ञानस्य आविष्कारा:

| **मञ्जूषा** |
|---|
| अस्माकं, सुखमयम् आनन्दमयम्, विज्ञानस्य, जीवनं, कृतम्, आविष्कारैः, रेलयानम्, विमानम्, अन्यैः यातायातसाधनैः, सुकरम् , निखिलम् कार्यम्, शीघ्रतया, विना परिश्रमेण, सुष्ठु भवति, रोगनिवारणाय, यन्त्राणि, समयस्य, परिश्रमस्य। |

**41.** भवान् दीपकः। भवतां मित्रं रमेशः अन्यस्मिन् नगरे वसति। तं प्रति नववर्षस्यागमेशुभकामनाः मंजूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा प्रेषयतु। **1x5=5**

द्वारकानगरम्

तिथि :-----

प्रिय मित्र रमेश,

सप्रेम नमस्ते।

नववत्सरोऽयं तव ____(i)____ प्रतिदिनं सौख्यं ____(ii)____ समृद्धिं ____(iii)____ च पूरयेत्। गृहे ____(iv)____ परिवारजनानां कृतेऽपि नववर्षस्य ____(v)____ स्युः।

तव सुहृत्,

दीपकः

| **मञ्जूषा** |
|---|
| सफलतां, पूरयेत्, जीवने, नवतां, सर्वेषां शुभकामनाः। |

**42.** अधोलिखितं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत : **1x5=5**



| मञ्जूषा |
| --- |
| आयोजिता, प्रतिवर्षं, भवति, स्वमित्रैः, सह, आवान् अहं द्रष्टुं, बालकाः, बालिकाः च, स्वरुच्यनुसारं वस्तूनि एकतः दशाननप्रतिकृतिः, दह्यते, अग्नौ, स्फोटाः भवन्ति महता उत्साहेन पश्यन्ति, जनाः। |

- o O o -